|| શ્રીરાઘવેંદ્ર મંગલાષ્ટકમ ||

શ્રીમદ્રામપદારવિંદમધુપઃ શ્રીમધ્વવંશાધિપઃ
સચ્છિષ્યોડુ ગણોડુપઃ શ્રિતજગદ્ગીર્વાણસત્પાદપઃ |
અત્યર્થં મનસા કૃતાચ્યુતજપઃ પાપાંધકારાતપઃ
શ્રીમત્સદ્ગુરુરાઘવેંદ્રયતિરાટ કુર્યાદ્ધ્રુવં મંગલમ || ૧ ||
કર્મંદીંદ્ર સુધીંદ્ર સદ્ગુરુ કરાંભોજોદ્ભવઃ સંતતં
પ્રાજ્યધ્યાનવશીકૃતાખિલજગદ્વાસ્તવ્યલક્ષ્મીધવઃ |
સચ્છાસ્ત્રાતિવિદૂષકાખિલમૃષાવાદીભકંઠીરવઃ
શ્રીમત્સદ્ગુરુરાઘવેંદ્રયતિરાટ કુર્યાદ્ધ્રુવં મંગલમ || ૨ ||
સાલંકારકકાવ્યનાટકકલાકાણાદપાતંજલ
ત્રય્યર્થસ્મૃતિજૈમિનીયકવિતાસંગીતપારંગતઃ |
વિપ્રક્ષત્રવિડંઘ્રિજાતમુખરાનેકપ્રજાસેવિતઃ
શ્રીમત્સદ્ગુરુરાઘવેંદ્રયતિરાટ કુર્યાદ્ધ્રુવં મંગલમ || ૩ ||
રંગોત્તુંગતરંગમંગલકરશ્રીતુંગભદ્રાતટ
પ્રત્યસ્થદ્વિજપુંગવાલયલસન્મંત્રાલયાખ્યે પુરે |
નવ્યેંદ્રોપલનીલભવ્યકરસદ્વૃંદાવનાંતર્ગતઃ
શ્રીમત્સદ્ગુરુરાઘવેંદ્રયતિરાટ કુર્યાદ્ધ્રુવં મંગલમ || ૪ ||
વિદ્વદ્રાજશિરઃકિરીટખચિતાનર્ઘ્યોરુરત્નપ્રભા
રાગાઘૌઘહપાદુકાદ્વયચરઃ પદ્માક્ષમાલાધરઃ |

ભાસ્વદ્દંડકમંડલૂજ્જ્વલકરો રક્તાંબરાડંબરઃ
શ્રીમત્સદ્ગુરુરાઘવેંદ્રયતિરાટ કુર્યાદ્ધ્રુવં મંગલમ || ૫ ||
યદ્વૃંદાવનસપ્રદક્ષિણનમસ્કારાભિષેકસ્તુતિ
ધ્યાનારાધનમૃદ્વિલેપનમુખાનેકોપચારાન સદા |
કારંકારમભિપ્રયાંતિ ચતુરો લોકાઃ પુમર્થાન સદા
શ્રીમત્સદ્ગુરુરાઘવેંદ્રયતિરાટ કુર્યાદ્ધ્રુવં મંગલમ || ૬ ||
વેદવ્યાસમુનીશમધ્વયતિરાટ્ટીકાર્યવાક્યામૃતં
જ્ઞાત્વાઽદ્વૈતમતં હલાહલસમં ત્યક્ત્વા સમાખ્યાપ્તયે |
સંખ્યાવત્સુખદાં દશોપનિષદાં વ્યાખ્યાં સમાખ્યાન મુદા
શ્રીમત્સદ્ગુરુરાઘવેંદ્રયતિરાટ કુર્યાદ્ધ્રુવં મંગલમ || ૭ ||
શ્રીમદ્વૈષ્ણવલોકજાલકગુરુઃ શ્રીમત્પરિવ્રાડ્ભરુઃ
શાસ્ત્રે દેવગુરુઃ શ્રિતામરતરુઃ પ્રત્યૂહગોત્રસ્વરુઃ |
ચેતોઽતીતશિરુસ્તથા જિતવરુઃ સત્સૌખ્યસંપત્કરુઃ
શ્રીમત્સદ્ગુરુરાઘવેંદ્રયતિરાટ કુર્યાદ્ધ્રુવં મંગલમ || ૮ ||
યઃ સંધ્યાસ્વનિશં ગુરોર્વ્રતિપતેઃ સન્મંગલસ્યાષ્ટકં
સદ્યઃ પાપહરં સ્વસેવિવિદુષાં ભક્ત્યૈવ બાભાષિતમ |
ભક્ત્યા વક્તિ સુસંપદં શુભપદં દીર્ઘાયુરારોગ્યકં
કીર્તિં પુત્રકલત્રબાંધવસુહૃન્મૂર્તીઃ પ્રયાતિ ધ્રુવમ || ૯ ||
|| ઇતિ શ્રીમદપ્પણાચાર્યકૃતં શ્રીરાઘવેંદ્રમંગલાષ્ટકમ ||